भारतम् – पूर्वम् इदानीं च




यस्य उत्तरदिशि हिमालयपर्वतश्रेणी, दक्षिणदिशि कन्याकुमारी, अन्यपार्श्वद्वये सागरः, तत् एतत् भारतं कश्चन विशालः भूखण्डः।

भारतं कियत् पुरातनम्? केचन वदन्ति– भूमिः इव अतिपुरातनम् इति। किन्तु एवं कथनं युक्तं न स्यात्। भारतम् इत्यस्य अर्थः अत्र तत्समवेता संस्कृतिः सभ्यता वा इति। भारतीयसंस्कृतेः प्राचीनत्वं न अस्माभिः सम्यक् ज्ञातम् इत्येव वक्तव्यं भवति। केचन वदन्ति– क्रि.पू. ५००० वर्षेभ्यः सा प्रचलन्ती अस्ति इति। अन्ये केचन ततोऽपि प्राचीना इति वदन्ति।

किन्तु एतावत् तु वक्तुं शक्यते यत् एतस्य काचित् सुदीर्घा परम्परा अस्ति इति। एतादृशी तत्त्वचिन्तनोपेता, परमप्राचीना, वैभवसमेता परम्परा न अन्यस्याः कस्याश्चित् अपि संस्कृतेः अस्ति। जगति सर्वप्राथम्येन ख्याताः ग्रन्थाः– वेदाः, सर्वप्राथम्येन ख्यातं महाकाव्यद्वयं– रामायणं महाभारतं च, जगति प्रथमः कथासङ्ग्रहः– कथासरित्सागरः, जगति प्रथमः आख्यायिकासङ्ग्रहः– पञ्चतन्त्रम्, प्राथम्येन ख्याताः नीतिकथाः– जातककथाः, इत्येतानि सर्वाणि भारते एव रचितानि। अपूर्वाः तात्त्विकविचाराः, दर्शनानि च अत्रैव प्रवृद्धानि।

भारतस्य मूलं नाम 'भारतवर्षम्' इति।

तवर्षम्



योऽयं भरतः लघूनि अनेकानि राज्यानि एकचक्राधिपत्ये आनीतवान्, तस्य भरतस्य इदं भारतम्। बहोः कालात् अनन्तरं पर्शियन् जनाः, 'सिन्धुनदस्य अनन्तरं स्थितः देशः' इत्यभिप्रायेण हिन्दु इति आहूतवन्तः। हिन्दुशब्दतः 'इण्डिया' (India) शब्दः उत्पन्नः। भारतेन सह ये व्यवहृतवन्तः प्राचीनाः पर्शियन् जनाः ग्रीक्जनाः च, तेषां दृष्ट्या हिन्दुपदस्य अर्थः भारतीयः इति आसीत्, न तु कस्यापि धर्मस्य सम्बन्धी इति।

प्राचीने भारते बहूनि राज्यानि आसन् चेदपि एतत् अखण्डं राष्ट्रम् आसीत्, यतः तेषु सर्वेषु राज्येषु एका एव सांस्कृतिक-साहित्यिक-परम्परा प्रवहति स्म।

दुर्दैववशात् १९४७ तमे वर्षे भारतस्य कश्चन भागः 'पाकिस्तान्' नाम्ना पृथक् अभवत्। एषः 'नूतनः' देशः अपि पुनः विभक्तः। ततः 'बांग्ला देशः' नाम तृतीयः देशः उत्पन्नः।

इदानीन्तनम् अफगानिस्तान् अपि बहुपूर्वं भारतस्य अङ्गम् एव आसीत् इति भाति। श्रीलङ्का, मलया, काम्बोडिया, इण्डोनेषिया, चैना इत्यादयः देशाः सर्वे भारतीयसंस्कृत्या प्रभाविताः आसन्। भारतस्य सांस्कृतिकः भूपटः भौगोलिकस्य भूपटस्य अपेक्षया अपि सुविशालः आसीत्।

देहली नगरस्य सप्त जन्मानि

इदानीं भारतस्य राजधानी देहली तस्मिन् स्थले अस्ति, यत्र, यस्य समीपे वा महाभारते प्रस्तुतं पाण्डवानां सुप्रसिद्धं नगरम् इन्द्रप्रस्थम् आसीत्। इदानीम् अपि देहलीनगरस्य कश्चन प्रदेशः 'इन्द्रपेट्'नाम्ना आह्वयते।

महाभारतकालात् अनन्तरं सप्तमवारं देहलीनगरं निर्मितम् इति श्रूयते। सप्तवारं चक्रवर्ती शाहजहान् एतत् नगरं पुनर्निर्मितवान्।

स्वातन्त्र्यप्राप्त्यनन्तरं नवदेहली इति नाम्ना कथ्यमानेन भागेन युक्ता देहली महत् वैशाल्यं सम्पादितवती। आधुनिकं रूपम् एतत् अष्टमं स्वरूपं (जन्म वा) इति वदामः चेत् तत्र न अनौचित्यम्।

पूर्वतनानां सप्तानां स्वरूपाणाम् अवशेषाः स्मरणानि वा आधुनिके एकस्मिन् जनसम्मर्दयुते नगरे दृश्यन्ते एव।

एकादशे शतके 'अनङ्गपालः' नाम शक्तिशाली राजा देहल्याः सुन्दरं स्वरूपं कल्पितवान्। तस्य दुर्गस्य अवशेषाः लालकोट्नाम्ना कुतुब् मिनार् समीपे इदानीम् अपि दृश्यन्ते।

देहल्याः अन्तिमः हिन्दूशासकः पृथ्वीराज् चौहान्। कनोज्राजकुमारी संयुक्ता स्वपितुः जयचन्द्रस्य इच्छां विरुध्य पृथ्वीराजं परिणीतवती।

एतेन कुपितः जयचन्द्रः टर्किश्-शासकेन महम्मद्घोरिनामकेन मिलित्वा देहलीम् आक्रान्तवान्। पृथ्वीराजः युद्धे मृतः अभवत्। (११९२ तमे वर्षे) संयुक्ता आत्महत्यया जीवनं समापितवती। अनन्तरवर्षे एव महम्मद्घोरी जयचन्द्रं वञ्चनया मारितवान्।

बहवः राजानः देहल्यां तिष्ठन्तः भारतं शासितवन्तः यथा, तथैव केचन देहलीं लुण्ठितवन्तः चापि। तादृशेषु लुण्ठाकेषु पर्शियाराजः नादिर् शाह प्रमुखः। सः अपरिमितम् ऐश्वर्यं मयूरसिंहासनं च देहलीतः नीतवान्। १७३८ तमे वर्षे ३०,००० जनान् मारितवान् चापि।

इदानीं देहली निर्मलं सुन्दरं च नगरम्। परितः स्थितैः कैश्चित् ग्रामैः समेता देहली इदानीं केन्द्रशासितप्रदेश अस्ति। इदानीम् अत्रत्या जनसङ्ख्या ६२ लक्षेभ्यः अधिका स्यात्।

भारतं पूर्वम् इदानीं च–

दण्डकारण्यम्



अनेकेषां पौराणिकानाम् ऐतिहासिकानां च घटनानां साक्षिभूतम् अस्ति दण्डकारण्यम्। एतत् प्राचीनकाले अनेकेषां महामुनीनां निवासस्थानम् आसीत्। एवं हि श्रूयते यत् अत्र राक्षसाः अपि निवसन्ति स्म इति। सीता-राम-लक्ष्मणाः कानिचन वर्षाणि एतस्मिन् अरण्ये स्थितवन्तः आसन्। तेषां वासतः अस्य बहूनि स्थानानि पवित्रीकृतानि सन्ति।

दण्डकारण्यस्य एकस्मिन् पार्श्वे गोदावरी, अपरस्मिन् पार्श्वे च नर्मदा प्रवहतः। मत्स्यकुण्डम्, इरावती, वंशधारा, नागावली, तमसा इत्यादयः नद्यः एतस्य अरण्यस्य द्वारा प्रवहन्ति। एतत् महारण्यम्, इदानीन्तनान् ओडिस्सा-मध्यप्रदेश-महाराष्ट्रान् आन्ध्रप्रदेशं च अभिव्याप्य आसीत्।

प्राचीने काले कदाचित् दण्डको नाम राजा एतस्मिन् अरण्ये सञ्चारं कुर्वन् आसीत्। तदा

तेन लावण्यवती मुनिकन्यका दृष्टा। तया आकृष्टः राजा कथञ्चित् तां वशीकर्तुं निश्चितवान्। किन्तु सा दण्डकं निराकृतवती। एतेन कुपितः दण्डकः तां बलात् वशीकर्तुम् उद्युक्तः। दण्डकतः आत्मानं रक्षन्ती सा ततः पलाय्य प्रवृत्तं समग्रं पितरं शुक्राचार्यं निवेदितवती। क्रुद्धः शुक्रः शापं दत्तवान् यत् तस्य राजधानी भस्मसाद्भवतु इति। एवं हि श्रूयते यत् अनन्तरक्षणे एव तदीयं नगरं अग्निज्वालाभिः आक्रान्तं सत् भस्मीभूतम् इति। कालान्तरे तत्र अरण्यं प्रवृद्धम्। एषः एव प्रदेशः दण्डकारण्यनाम्ना ख्यातः अभवत्।

अद्यतनं दण्डकारण्यं वनसम्पदः आकरः अस्ति। प्राकृतिकानि बहूनि रमणीयानि स्थलानि एतस्मिन् अरण्ये सन्ति। देशे सुनिश्चितरूपेण जलवाय्वोः कल्पने एतस्य अरण्यस्य महत्त्वपूर्णं पात्रम् अस्ति।

किन्तु एषु दिनेषु काष्ठच्छेदकानां कारणतः एतत् अरण्यं नश्यत् अस्ति। 'पूर्वघट्टाः' इति ख्याताः अत्रत्याः पर्वताः अपि ह्रासम् अनुभवन्तः सन्ति।

मगधः

अस्माकं प्राचीनराज्येषु अन्यतमः अस्ति मगधदेशः। किञ्चिदिव भिन्नरूपेण वेदे अपि एतस्य प्रस्तावः कृतः दृश्यते।

पौराणिककथा एवम् अस्ति– जरासन्धस्य पिता बृहद्रथः एतत् राज्यं स्थापितवान्। जरासन्धः शौर्यमदेन व्यवहरन् सर्वान् राज्ञः बन्दीकृत्य तान् इष्टदेवतायै बलिरूपेण अर्पयितुम् इष्टवान्। बलशाली भीमः मल्लयुद्धे दुष्टं जरासन्धं मारयित्वा तान् राज्ञः बन्धविमुक्तान् कृतवान्। जरासन्धस्य अनन्तरं मगधं पालितवान् तत्पुत्रः कुरुक्षेत्रयुद्धे पाण्डवानां साहाय्यं कृतवान्।

इतिहासयुगे बिम्बसारः नाम महाराजः मगधस्य पालकः आसीत्। तस्य शासनकाले एव महावीरः जैनमतं, गौतमबुद्धः च बौद्धमतं तत्प्रदेशे प्रसारितवन्तौ। तयोः उभयोः अपि विषये राज्ञः बिम्बसारस्य विशेषादरः आसीत्।

बिम्बसारस्य मगधराज्यं यत्र आसीत् तत्र इदानीं पाटना, गया इति मण्डलद्वयं तिष्ठति। बिम्बसारस्य पुत्र अजातशत्रुः गङ्गा-सोनानद्योः सङ्गमस्थले पाटलीग्रांदुर्गं निर्मितवान्। दुर्गं परितः नगरं प्रवृद्धम्। तच्च नगरं पाटलीपुत्रनाम्ना कुसुमपुरनाम्ना च आहूयते स्म। इदानीं तस्य नाम पाटना इति सञ्जातम् अस्ति।

पूर्वं मगधराज्यं नितरां प्रबलम् आसीत्। अतः एव भूमण्डलम् एव जेतुकामः ग्रीक्चक्रवर्ती अलेक्साण्डर् अपि एतस्य नगरस्य उपरि आक्रमणं कर्तुं न इष्टवान्। पाटलीपुत्रं राजधानीनगरम्। तत् केन्द्रीकृत्य बहवः राजानः राज्यशासनं कृतवन्तः। तेषु मौर्यः चन्द्रगुप्तः, तत्पौत्रः

जम्बीरफलखादने नवविक्रमः

गिन्नीसुपुस्तके स्वनाम योजयितुम् इच्छन् कोयम्बत्तूरुप्रदेशीयः ३७ वर्षीयः एस्. पार्थसारथिः त्रीणि जम्बीरफलानि द्वादशधा विभज्य ११.८ सेकेण्ड् अभ्यन्तरे खादितवान्। एतेन नूतनं विक्रमं स्थापयन् सः वदति यत् इतः पूर्वम् एतद्विषये विक्रमं स्थापितवन्तं बाबी केम्पवर्यम् अहम् अतिक्रम्य गतः अस्मि इति।



चक्रवर्ती अशोकश्च प्रसिद्धौ।

इदानीं पाटना बिहारराज्यस्य राजधानी। गयामण्डलस्य गयानगरं इदानीम्।


बुद्धगयानगरं च पवित्रं भावयन्ति जनाः। गयानगरे मगधविश्वविद्यालयः अस्ति



अवन्ती उज्जयिनी च

अवन्ती तादृशं प्राचीनं राज्यं, यच्च महाभारतकालात् पूर्वम् एव सुप्रसिद्धम् आसीत्। एतस्य एव अवन्तिका इत्यपि नामान्तरम्।

पूर्वम् अवन्ती द्विधा विभक्तम् आसीत्– दक्षिणावन्ती उत्तरावन्ती चेति। दक्षिणावन्त्याः राजधानी माहिष्मतीनगरं, यस्य च अद्यतनं नाम मान्धाता इति।



उत्तरावन्त्याः राजधानी उज्जायनी। (उज्जैनी इति वा) एतत् नगरम् इदानीम् एतेन एव नाम्ना मध्यप्रदेशराज्ये मालवानामके प्रदेशे अस्ति।

२५०० वर्षेभ्यः पूर्वं भारतं षोडशधा जनपदेषु विभक्तम् आसीत् इति प्राचीनबौद्धवाङ्मयात् ज्ञायते। षोडशेषु जनपदेषु अवन्ती अपि अन्यतमम्।



उज्जयिनी न केवलं प्राचीनं नगरम्, अपि तु अस्माकं देशे स्थितेषु सप्तसु पुण्यक्षेत्रेषु अन्यतमम् अपि अस्ति।


सुप्रसिद्धः राजा विक्रमादित्यः उज्जयिनीं राजधानीं परिकल्प्य राज्यशासनं करोति स्म। तस्य आस्थाने कालिदासादयः नव रत्नानि आसन्।

कविकुलगुरुः कालिदासः मेघदूतनामके खण्डकाव्ये उज्जयिन्याः सौन्दर्यातिशयं, क्षिप्रानद्याः रमणीयतां च मनोहारिण्या शैल्या वर्णितवान् अस्ति। उज्जयिनीस्थं महाकालस्य देवालयम् अपि सः तस्मिन् काव्ये वर्णितवान् अस्ति।

चक्रवर्ती अशोकः मौर्यसिंहासनस्य आरोहणात् पूर्वं मौर्यराज्यस्य प्रतिनिधिः सन् उज्जयिन्याः शासनं करोति स्म।

इदानीं द्वादशसु वर्षेषु एकवारम् अत्र कुम्भमेलोत्सवः महता वैभवेन प्रचलति।


गान्धारदेशः तक्षशिला च



भारतस्य अद्यतनभूपटे गान्धारनामकः प्रदेशः न दृश्यते। तथापि अस्मासु तादृशः कोऽपि प्रायः न स्यात्, यश्च गान्धारराज्यस्य नाम न श्रुतवान् स्यात्।

अस्माकं प्राचीनसाहित्येषु गान्धारस्य उल्लेखः तत्र तत्र कृतः दृश्यते। अङ्ग-वङ्ग-कलिङ्गादिषु ५४ देशेषु गान्धारदेशः अपि अन्यतमः। धृतराष्ट्रस्य पत्नी गान्धारी गान्धारदेशस्य युवराज्ञी आसीत्। अतः एव तस्याः नाम गान्धारी इति अभवत्। गान्धार्याः सहोदरः शकुनिः गान्धारदेशस्य राजा आसीत्। कौरव-पाण्डवयुद्धे शकुनेः महत्त्वपूर्णं स्थानम् आसीत् इति तु सर्वविदितं खलु?

सिन्धुनदम् उभयतः गान्धारराज्यं प्रसृतम् आसीत्। स च प्रदेशः इदानीं पाकिस्थानदेशे अस्ति, रावलपिण्डी-पेशावर् इति मण्डलद्वयनाम्ना



व्यवह्रियमाणः अस्ति च।

महाभारतकालात् अनन्तरम् अपि गान्धारस्य प्रसिद्धिः अविच्छिन्ना आसीत्। तस्मिन् राज्ये तक्षशिला पुष्कलावती चेति नगरे उच्चशिक्षणस्य, संस्कृतेः, वाणिज्यस्य च प्रमुखे केन्द्रे आस्ताम्।

सुविख्याते तक्षशिलविश्वविद्यालये जगद्विख्याताः अनेके विद्वांसः विद्याभ्यासं कृतवन्तः आसन्। क्रि.पू. ५ शतके बिम्बसारः मगधदेशं पालयन् आसीत्। तस्य आस्थाने स्थितः सुप्रसिद्धः वैद्यशास्त्रज्ञः जीवकः तक्षशिलाविश्वविद्यालये सप्त वर्षाणि यावत् अध्ययनं कृतवान् आसीत्।

रावलपिण्डीतः ३० कि.मी. दूरे स्थितस्य सरायकोलानामकस्य रेल्वेस्थानकस्य समीपे तक्षशिलायाः अवशेषाः प्राप्ताः सन्ति।

गान्धारराज्यं किञ्चित्कालं यावत् फारस्साम्राज्यस्य अधीनम् आसीत्। एतस्य राज्यस्य केषुचित् प्रदेशेषु ग्रीकृजनाः अपि स्वकीयम् अधिकारं स्थापितवन्तः आसन्। एतस्य कारणतः एव अत्र उपलभ्यमानायां शिल्पकलायां विदेशीयप्रभावः स्फुटं दृश्यते। इदानीम् अपि गान्धारकलानां विशिष्टं स्थानम् अस्ति।

पर्वतानां मध्ये, खातेषु, उपत्यकासु च निवसताम् असाधारणधैर्येण साहासेन च ख्यातानां पठानृजनानां मातृभूमेः निमित्तं पेशावर् सिंहद्वारम् अस्ति।

भारतं—पूर्वम् इदानीं च

कन्याकुब्जं, यत् इदानीं कनोज्


उत्तरप्रदेशराज्ये फरूकाबाद्मण्डले स्थितं कनौज् एकं लघु नगरम्। एतस्य नगरस्य समीपे अर्धवृत्ताकारेण प्राचीनस्य कन्याकुब्जनगरस्य अवशेषाः ७ की.मी. यांवत् प्रसृताः सन्ति।

महाभारतकाले, ततः पूर्वम् अपि, कन्याकुब्जनगरं महतः साम्राज्यस्य राजधानी आसीत्। सप्तमे शतके एतत् नगरं, असङ्ख्येभ्यः आलयेभ्यः बौद्धारामेभ्यः च निर्गच्छद्भिः शङ्खध्वनिभिः घण्टानादैः च प्रतिध्वनितं भवति स्म।

सुप्रसिद्धः चीनायात्रिकः ह्यूयनत्साङ्ग् क्रि.श. ६२६ तमे वर्षे एतत् नगरम् आगतवान्। सप्त वर्षाणि यावत् अत्रैव स्थितवान् चापि।

कन्याकुब्जं राजधानीं परिकल्प्य हर्षवर्धनः राज्यशासनं करोति स्म। हर्षवर्धनस्य शासनकाले अत्र अनेके तटाकाः निर्मिताः। विशालाः राजमार्गाः उद्यानानि च निर्मितानि। यात्रिकाणां निमित्तं तत्र तत्र धर्मशालाः अपि निर्मिताः। एवं हर्षवर्धनः कन्याकुब्जं सुन्दरनगररूपेण सज्जीकृतवान् आसीत्।

एकादशशतकस्य आदिमे भागे राज्ञा



महम्मदेन एतस्य नगरस्य उपरि आक्रमणं कृतम्। तत्कारणतः नगरस्य प्रमुखाः भागाः उध्वस्ताः अभवन्। अनन्तरकाले राठौर्राजाः एतस्य नगरस्य पुनर्निर्माणं कृतवन्तः।

अन्तिमः राठौर्राजः जयचन्द्रः। एतस्य इच्छां विरुद्ध्य एतदीयां कन्याम् अजमेर-दिल्ली-शासकः पृथ्वीराजः परिणीतवान्। एतेन क्रुद्धः जयचन्द्रः प्रतीकारं साधयितुम् इच्छन् महम्मद-घोरिवर्यं साहाय्यं प्रार्थितवान्। आक्रमणार्थं गतः महम्मदः प्रथमं पृथ्वीराजेन पराजितः अभवत् चेदपि अनन्तरकाले जयं प्राप्य पृथ्वीराजं यमसदनं प्रेषितवान्।

महम्मदघोरी एतावता एव तृप्तः न जातः। सः प्रतिगच्छन् जयचन्द्रम् अपि पराजितवान्।

महम्मदस्य सेनापतिना कुतुबुद्दीनेन जयचन्द्रः क्रि.श. ११११२ तमे वर्षे मारितः अभवत्।

वार्ताविशेषः–

काश्मीरसमस्यायाः पृष्ठभूमिः



अस्माकं पुराणैः ज्ञायते यत् कश्यपमुनेः नाम्नः कारणतः काश्मीरम् इति नाम आगतम् इति।

प्राचीने भारते बहूनि लघूनि राज्यानि आसन्, यानि च अल्पसामर्थ्यवद्भिः राजभिः पाल्यते स्म। किन्तु विशेषः नाम

एतानि राज्यानि अखण्डस्य भारतस्य अङ्गानि इति भावना आसीत् तदा।

स्वातन्त्र्यसङ्ग्रामस्य अन्तिमे भागे महम्मद् अली जिन्नावर्यस्य नायकत्वे 'मुस्लिम् लीग्' संस्थया प्रतिपादितं यत् मुसल्मानानां निमित्तं पृथक् स्वतन्त्रं राज्यम् आवश्यकम् इति। विभाजकनीतौ आदरवन्तः आंग्लेयाः जिन्नावर्यं प्रोत्साहितवन्तः। तस्मिन् काले बहवः मुसल्माननायकाः अपि उक्तवन्तः यत् मताधारेण देशस्य विभाजनं न उचितम् इति। तथापि जिन्नावर्यस्य दुराग्रहकारणतः भारतं द्विधा विभक्तम्। पाकिस्थानस्य उदयः जातः।

तेषु दिनेषु जम्मूकाश्मीरप्रदेशस्य शासकः आसीत् राजा हरिसिंहः। इदानीं तस्य मनसि द्वैधीभावः – कः पक्षः आश्रयणीयः इति। तस्मिन् एव समये पाकिस्थानीयाः केचन पर्वतवासिनः काश्मीरस्य उपरि आक्रमणं कृतवन्तः। काश्मीरे मुसल्मानाः एव अधिक-सङ्ख्याकाः। तेषां तदा नायकः आसीत् शेक् अब्दुल्ला। तस्य मार्गदर्शनस्य अनुसारं राजा हरिसिंहः निर्णीतवान् यत् काश्मीरं भारतेन सह स्थास्यति इति। अनन्तरं भारतेन सेना प्रेषिता। भारतेन आक्रमणकाराः प्रतिप्रेषिताः। किन्तु एतावता आक्रमणकारैः काश्मीरस्य अधिकांशः भागः स्वाधीनीकृतः आसीत्। भारतेन तदा एव स्वातन्त्र्यं प्राप्तम् आसीत् खलु? अतः सः शान्तिप्रियतां स्वनीतिं मन्यते स्म। आक्रमणकारैः वशीकृताः प्रदेशाः युद्धद्वारा प्रतिस्वीकरणीयाः चेत् रक्तप्रवाहः प्रवहेत्। एतेन शान्तिप्रियतायाः भङ्गः स्यात् इति आलोच्य भारतेन संयुक्तराष्ट्रसङ्घस्य सुरक्षापरिषत् प्रार्थिता यत् एतस्मिन् विषये निर्णयः दातव्यः इति।

पाकिस्थानेन एषः आक्रान्तः प्रदेशः 'स्वतन्त्रकाश्मीरम्' इति नाम्ना आहूतः। किन्तु अत्र अविद्या दारिद्र्यं च अधिकम्।

एकं तु स्पष्टं यत् मतस्य आधारेण देशस्य विभजनम् अनुचितम् इति। बङ्गलादेशस्य जनाः अपि मुसल्मानाः एव, तथापि ते पाकिस्थानतः पृथक् जाताः। अस्माकं देशे अपि मुसल्मानानां सङ्ख्या न न्यूना। किन्तु एषा वस्तुस्थितिः बहुभिः न अवगम्यते इति तु खेदावहः विषयः।

बहवः इदानीं काश्मीरीयेषु जनेषु अनुचिताम् आशां जागरयन्तः सन्ति। जनानाम् अपहरणं मारणं च ये कुर्वन्ति तादृशानां भयोत्पादकानां प्रशिक्षणादिना साहाय्यं कुर्वन्तः देशे शान्तेः भङ्गं कुर्वन्तः सन्ति, देशद्रोहम् आचरन्तः सन्ति च।

एतादृशैः एव कारणैः अद्य काश्मीरविषये बह्व्यः समस्याः बहूनि कष्टानि च उत्पन्नानि सन्ति।

कामरूपराज्यम्

अस्माकं पुराणेषु प्रस्तुतेषु सुप्रसिद्धेषु राज्येषु अन्यतमम् अस्ति कामरूपं, यस्य च राजधानी आसीत् – प्राग्ज्योतिषपुरम्।

अत्र प्रार्थितं सर्वं प्राप्यते स्म इत्यतः कामरूपम् इति एतस्य नाम इति केचन जनाः वदन्ति।

अन्ये केचन एतत्सम्बन्धे पुराणकथां काञ्चित् प्रस्तुतीकुर्वन्ति।

ते वदन्ति– 'शिवस्य कोपाग्निना दग्धः कामः (मन्मथः) भस्मीभूतः जातः। अनन्तरं मन्मथपत्न्याः रतिदेव्याः तपसा सन्तुष्टः शिवः मन्मथम् उज्जीवितवान्। एवं मन्मथः अत्र स्वस्य रूपं पुनः प्राप्तवान् इत्यतः 'कामरूपम्' इति नाम' इति।

प्राग्ज्योतिषपुरस्य अर्थः तु– पूर्वस्यां दिशि स्थितं ज्योतिःस्वरूपं नगरम् इति।

प्राचीनं कामरूपराज्यम् इदानीम् अस्सांराज्यनाम्ना व्यवह्रियते। प्राग्ज्योतिषपुरं च गौहातीनगरनाम्ना व्यवह्रियते। गौहातीसमीपे पर्वतस्य उपरि कामरूपराज्यस्य अधिदेवतायाः 'कामाक्षस्य' मन्दिरम् अस्ति।

पुराणकथाभिः ज्ञायते यत् प्रसिद्धः





राक्षसगोधिकानिमित्तं खननम्

बहुपूर्वम् एतस्यां भूम्यां राक्षसगोधिकाः (डिनोसार्स्) निवसन्ति स्म। एतद्विषये अधिकं विषयं सङ्ग्रहीतुं विज्ञानिनः डेनवर्पर्वतप्रदेशे खननं कुर्वन्तः सन्ति। एतस्य पर्वतस्य उत्पत्तितः पूर्वम् एव – तन्नाम १४ कोटिवर्षेभ्यः पूर्वम् – एतस्मिन् प्रदेशे राक्षसगोधिकाः निवसन्ति स्म इति विश्वस्यते। अत्र तादृशीनां राक्षसगोधिकानाम् अस्थिपञ्जराणि प्राप्तानि सन्ति। एतस्य आधारेण केचन नूतनाः अंशाः प्रकाशिताः भवेयुः इति भाव्यते।



राक्षसः नरकासुरः मिथिलातः कामरूपम् आगतवान् इति। एतस्य पुत्रः भगदत्तः महाभारतयुद्धे कौरवपक्षम् आश्रित्य युद्धं कृत्वा दिवं गतः।

इतिहासात् ज्ञायते यत् समुद्रगुप्तस्य सामन्तराजः पुष्यवर्मा क्रि.श. चतुर्थे शतके एतस्य प्रदेशस्य शासकः आसीत् इति।

१३ शतके षान्वंशीयाः अहोमराजाः बर्मामार्गेण आगत्य अत्रत्यान् बहून् भूभागान् स्वाधीनीकृतवन्तः। तदारभ्य एतस्य प्रदेशस्य नाम 'अस्साम्' इति अभवत् इति श्रूयते।

असमा भूमिः अत्रत्या इत्यतः 'अस्साम्' इति नाम आगतम् इत्यपि केचन जनाः कथयन्ति।

१८२४ तमे वर्षे एषः प्रदेशः आंग्लानाम् अधीनः जातः।

अहोमराजाः कालान्तरे 'षान्'जातीयानि नामानि परित्यज्य हिन्दुनामानि एव धृतवन्तः। धैर्येण साहसेन च एते सुविख्याताः। यवनानां पठानजनानां च दुराक्रमणतः एते स्वप्रदेशान् रक्षितवन्तः आसन्।

इदानीम् अस्सांराज्यं ७,८५२३ वर्ग-कि.मी. विस्तृतम् अस्ति। गौहातीसमीपस्थं दिसपुरनगरम् एतस्य राज्यस्य नूतन-राजधानी अस्ति।

र
स
या
र्ताः

न्यूनीक्रियमाणम् अस्ति दुर्व्यसनम्

अमेरिकादेशे गतवर्षे धूमपानरूपं दुर्व्यसनं ५% न्यूनं जातम् इति ज्ञायते। काचित् समितिः कथयति यत् अत्र १९८९ तमे वर्षे ५३,३०० कोटिमिताः धूमवर्तिकाः सेविताः इति। इदानीं तु धूमवर्तिकायाः उपयोगे ७% न्यूनता दृश्यते।



भारतम् – पूर्वम् इदानीं च–

अङ्गराज्यं

अङ्गराज्यस्य नाम्नः श्रवणात् एव महाभारते प्रस्तुतः दानवीरकर्णः स्मर्यते। दुर्योधनः तम् अङ्गराज्याधिपतिं कृतवान् आसीत्। तथापि कर्णस्य जीवनस्य अधिकः भागः हस्तिनापुरे एव यापितः अभवत्। कुरुक्षेत्रयुद्धे कर्णेन वीरगतिः प्राप्ता।

अद्यतनस्य बिहारराज्यस्य पूर्वभागः एव प्राचीने काले अङ्गराज्यनाम्ना आहूयते स्म। तत्काले एषः प्रदेशः सम्पद्युक्तः आसीत्। कालान्तरे एषः भागः मगधसाम्राज्यस्य अन्तर्गतः अभवत्। अङ्गदेशस्य राजधानी चम्पानगरम् अतिरमणीयम् आसीत्। राजमहल् पर्वतश्रेण्याः पश्चिमदिशि चम्पा-गङ्गानद्योः सङ्गमस्य समीपे चम्पानगरम् आसीत्।

क्रि.श. २ शताब्दे भारतदेशतः केचन पथिकाः 'अन्नं' प्रदेशं प्रति (यश्च प्रदेशः इदानीं वियेट्नां नाम्ना ख्यातः) गतवन्तः। तैः तत्र राज्यं स्थापितम्। स्वराज्यस्य राजधान्याः नाम 'चम्पा' इति निश्चितं च। ततः आरभ्य चम्पा प्रसिद्धिं गता।

इदानीम् अङ्गराज्यं बिहारराज्ये अस्ति इति तु सत्यम्। किन्तु कालकारणतः तस्य राज्यस्य स्वरूपं तु सर्वथा विनष्टम् अस्ति। भागल्पुरसमीपस्थौ 'चम्पानगरम्' 'चम्पापुरम्' इत्येतौ ग्रामौ प्राचीनं चम्पानगरं स्मारयतः।



ये यात्रिकाः भागल्पुरं गच्छन्ति ते कोलगांव्समीपे स्थितस्य शिलामन्दिरस्य गुहानां च दर्शने कुतूहलिनः भवन्ति।

चम्पानगरं च




भागल्पुरसमीपे अन्यानि अपि कानिचन दर्शनीयानि स्थलानि सन्ति एव। किन्तु केभ्यश्चित् वर्षेभ्यः पूर्वम्, इतिहासप्रसिद्धस्य एतस्य चम्पानगरस्य विषये बहवः अधिकं न जानन्ति स्म।

अयोध्यानगरम्

'अयोध्या' इत्यस्य पदस्य अर्थः जेतुम् अशक्या नगरी इति। एतत् नगरं पूर्वं कोसलदेशस्य राजधानी आसीत्। एतत् सरयूनद्याः तटे अस्ति। सूर्यवंशीयाः राजानः कोसलदेशं परिपालयन्ति स्म।

सप्तसु पवित्रेषु नगरेषु अन्यतमम् अस्ति अयोध्यानगरम्। अयोध्या श्रीरामस्य जन्मभूमिः। अतः भारतीयाः एतत् नगरं पवित्रतमं भावयन्ति। श्रीरामजन्मस्थानं, यागभूमिं, पाकशालां च इदानीम् अपि अत्र द्रष्टुं शक्यम् इति अत्रत्याः जनाः वदन्ति।

कोसलस्य राजधान्याः अयोध्यायाः अपरं नाम साकेतपुरम् इति। किञ्चित्कालं यावत् श्रावस्तिः अपि कोसलस्य राजधानी आसीत्। ४-५ शतककाले अयोध्या गुप्तवंशीयानां राज्ञां द्वितीयराजधानी



आसीत्। कालप्रभावतः अनन्तरदिनेषु अयोध्यायाः राजधानीप्रामुख्यं नष्टम् अभवत्। किन्तु मथुरा इव अयोध्या अपि सहस्रशः वर्षेभ्यः भारतीयानां जनानाम् आदरपात्रम् अस्ति, श्रद्धाकेन्द्रम् अस्ति।


कस्मिंश्चित् कालखण्डे बौद्धजैनादीनि मतानि अपि अयोध्यायां प्रमुखतया विराजमानानि आसन्। चतुर्विंशतिः तीर्थङ्कराः प्रसिद्धाः खलु? तेषु त्रयोविंशतिः तीर्थङ्कराः इक्ष्वाकुवंशीयाः एव। तेषु सुप्रसिद्धाः आदिनाथः, अजितनाथः, अविनन्दनाथः, अनन्तनाथः, सुमतिनाथः इत्येते पञ्च तीर्थङ्कराः आयोध्यायाम् जन्म प्राप्तवन्तः आसन्।

एषु दिनेषु अयोध्यानगरम् उत्तरप्रदेशराज्ये लंख्नो-गोरखपुर-रेल्वे-स्थानकयोः मध्ये तिष्ठति। प्राचीने काले अयोध्यायाः विषये यः पावित्र्यभावः आसीत् स एव भावः अक्षीणतया जागर्ति इदानीम् अपि।

सीतारामयोः देवालयाः अत्र सन्ति। तथैव श्रीरामपुत्रेण कुशेन निर्मितं नागेश्वरमन्दिरम् अपि अत्र अस्ति। हनुमान्घढ्प्रदेशे स्थितः हनूमतः देवालयः अपि अत्र प्रसिद्धः अस्ति।

अयोध्यातः २५ कि.मी. दूरे नन्दिग्रामः अस्ति। रामः यदा सीतालक्ष्मणाभ्यां सह अरण्यं गतः तदा भरतः एतस्मिन् ग्रामे एव तिष्ठन् चतुर्दश वर्षाणि यावत् राज्यपालनं कृतवान् इति श्रूयते।

सिन्धुनदः सिन्धप्रदेशः च



भारतदेशः आंग्लभाषया 'इण्डिया' शब्देन उच्यते। सिन्धुनदः आंग्लेयैः 'इण्डस्' इति उक्तः। तदाधारेण इण्डियाशब्दः उत्पन्नः। काश्मीर-पञ्जाबभूभागे प्रवहन् सिन्धुनदः अरबसागरेण मिलति। सोहन्, झेलम्, चिनाब्, रावी, बियास्, सतलज् इत्येताः नद्यः सिन्धुनदेन मिलन्ति।

सिन्धुनदम् उभयतः स्थितः विशालः भूप्रदेशः सिन्धप्रदेशः इति उच्यते। सहस्रशः वर्षेभ्यः पूर्वम् एव अत्र श्रेष्ठा संस्कृतिः विकासं गता आसीत्। हरप्पा-मोहिञ्जोदारो-विषये केन वा न श्रुतम्? एतस्मिन् प्रदेशे पञ्चसहस्रवर्षेभ्यः पूर्वं स्थितानां सुसम्पन्नानां नगराणाम् अवशेषाः प्राप्ताः सन्ति। एतानि नगराणि


विशालैः मार्गैः, उन्नतैः भवनैः, रमणीयैः उद्यानैः च युक्तानि आसन्। काचक-ताम्र-कांस्य-रजत-सुवर्ण–प्रभृतिभिः निर्मिताः उत्तमाः कलाकृतयः अत्र अवशेषरूपेण प्राप्ताः सन्ति।

सिन्धुनदेन बहूनां साम्राज्यानाम् उदयः अस्तः च दृष्टः अस्ति। प्राचीने भारतीयसाहित्ये एतस्य प्रदेशस्य सुसम्पन्नता श्रेष्ठता च सम्यक् वर्णिता दृश्यते। अलेक्साण्डर् एतस्य प्रदेशस्य उपरि आक्रमणं कृतवान् आसीत्। सिन्धप्रदेशस्य अन्तिमः राजा दहिरः। एषः ७११ तमे वर्षे मोहम्मदकासिमं विरुध्य कृते युद्धे प्राणान् अत्यजत्।

१९४७ तमे वर्षे दुर्दैववशात् भारतस्य विभागः जातः। सिन्धप्रदेशः पाकिस्थानस्य अधीनः जातः। सिन्धप्रदेशस्थं प्रमुखं नगरं कराची।


श्रावस्तीनगरम्

उत्तरप्रदेशराज्ये रापतीनद्याः तीरे सहेत-महेतग्रामसमीपे पुरातनस्य श्रावस्तीनगरस्य अवशेषाः प्राप्ताः सन्ति। श्रावस्तीनगरम् इक्ष्वाकुवंशीयेन राज्ञा श्रावस्तेन निर्मितम् आसीत्। अतः एव श्रावस्ती इति नाम आगतम्। पुराणेषु ऐतिहासिकग्रन्थेषु बौद्धग्रन्थेषु च एतस्य नगरस्य उल्लेखः बहुधा कृतः दृश्यते।



गौतमबुद्धस्य काले एतत् नगरं कोसलदेशस्य राजधानी आसीत्। तदा प्रसेनजित् नाम राजा शासनं करोति स्म। विशालैः मार्गैः रमणीयैः उद्यानैः च युक्तम् एतत् नगरं मनोहरम् आसीत्। एतस्मिन् नगरे बहवः प्रसिद्धाः वणिजः निवसन्ति स्म। तेषु सुदत्तः नाम वणिक् सुविख्यातः, योऽयम् अनन्तरकाले गौतमबुद्धस्य शिष्यः जातः। सुदत्तस्य प्रार्थनां पुरस्कुर्वन् गौतमबुद्धः कानिचन दिनानि यावत् श्रावस्तीनगरे स्थितः आसीत्। अनन्तरकाले अत्र सुविशालः बौद्धारामः स्थापितः अभवत्।

अङ्गुलिमालः नाम कुख्यातः लुण्ठाकः श्रावस्तीसमीपे अरण्ये निवसति स्म। एषः पान्थान् लुण्ठयित्वा तेषाम् अङ्गुलीः कर्तयित्वा मालारूपेण कण्ठे धरति स्म। 'सहस्रम् अङ्गुलयः धियन्ते मया' इति तेन प्रतिज्ञा कृता आसीत्। राजा प्रयतमानः आसीत् यत् अङ्गुलिमालः कथमपि ग्रहीतव्यः इति। राज्ञः एतं प्रयत्नं पुत्रं निवेदयितुं तदीया माता अरण्यम् आगता आसीत्। स्वप्रतिज्ञायाः पूरणार्थम् अङ्गुलिमालेन एका अङ्गुलिः अपेक्ष्यते स्म। अतः सः स्वस्य मातुः अङ्गुलिम् एव कर्तयितुम् उद्युक्तः। तावता तत्र आगतः बुद्धः स्वकीयैः उपदेशैः तस्य हृदये परिवर्तनम् आनीतवान्। तम्



अहिंसामार्गानुयायिनं कृतवान् च। पश्चात्तापेन दग्धः अभवत् अङ्गुलिमालः। बौद्धभिक्षुत्वं प्राप्य श्रावस्तीनगरस्य मार्गेषु गच्छन्तं तं लुण्ठाकाङ्गुलिमालत्वेन अभिजनन्तः पौराः, तम् उद्दिश्य पाषाणान् क्षिप्तवन्तः। किन्तु अङ्गुलिमालः अल्पम् अपि विरोधं न प्रकटितवान्। जनानां पीडनेन ताडनेन च सः गतप्राणः जातः।

सहेत-महेतग्रामसमीपे प्राप्ताः अवशेषाः श्रावस्तीनगरस्य वैभवं कथां च स्मारयन्ति।